नेपाल सरकार

शिक्षक सेवा आयोग

माध्यमिक तह, तृतीय श्रेणी शिक्षक पदको खुला प्रतियोगितात्मक परीक्षाका लागि

फलितज्योतिष विषयको पाठ्यक्रम २०८१

**खण्ड : क**

**प्रकरणमेकम् – फलितज्योतिषविषयसम्बद्धावधारणा**

१.१ ज्योतिषवाङ्मयस्य पृष्ठभूमौ फलितज्योतिषस्य परिचयो वैशिष्ट्यञ्च

१.२ फलितज्योतिषस्य प्रमुखक्षेत्राण्याधारभूतविषयाश्च

१.३ विद्यालये फलितज्योतिषशिक्षणस्यावश्यकता महत्त्वमौचित्यञ्च

१.४ नेपाले फलितज्योतिषस्य प्रयोगः, परम्परा, सामाजिकप्रभावः, संस्कृतौ तस्यावदानञ्च

१.५ फलितज्योतिष-सिद्धान्तज्योतिषयोरन्तःसम्बन्धः भिन्नता च

**प्रकरणं द्वितीयम् – फलितज्योतिषस्य सैद्धान्तिकावधारणा**

२.१ फलितज्योतिषस्य स्वरूपम् (उत्पत्तिः, विकासक्रमः, भेदाः, प्रमुखा आचार्याः, वर्तमानस्थितिश्च)

२.२ विश्वस्मिन् विश्वे विविधराष्ट्रे क्षेत्रे च फलितज्योतिषस्य प्रयोगस्तत्प्रभावश्च

२.३ पौरस्त्यफलादेशपरम्परा, फलादेशे प्रचलिताः पद्धतयश्च

२.४ फलादेशे जातक-ताजिक-सामुद्रिक-स्वर-प्रश्न-रमल-स्वप्न-शकुनप्रभृतीनां पद्धतीनां तुलनात्मकमध्ययनम्

२.५ शिक्षार्थिनां स्तरवृद्धावात्मनिर्भरतायै च फलितज्योतिषशिक्षणस्य महत्त्वम्

**प्रकरणं तृतीयम् – फलितज्योतिषशिक्षणे शिक्षणयोजना कक्षाव्यवस्थापनञ्च**

३.१ शिक्षणयोजनायाः परिचयः, आवश्यकता, निर्माण-प्रयोगौ च

३.२ शिक्षणयोजनाया अवधारणा, उद्देश्यनिर्माणम्, फलितज्योतिषशिक्षणे पाठ्यांशस्य दैनिकी, साप्ताहिकी, पाक्षिकी, मासिकी, त्रैमासिकी, षाण्मासिकी, वार्षिकी योजना अभ्यासाश्च

३.३ फलितज्योतिषशिक्षणे छात्रेभ्यो रोचकतोत्पादनाय प्रयोज्यमानानां विविधकुण्डलीनाम्, ग्रहाणां छायाचित्राणां, मानचित्राणाम्, गोलीयमानचित्राणाम्, नक्षत्रपटानामाकाशीयस्थितिबोधकपटचित्राणाम्, वेधशालायाश्चित्राणां दूरवीक्षणयन्त्राणाञ्च प्रयोगविधिः

३.४ फलितज्योतिषशिक्षणक्रमे कक्षासञ्चालनस्य कक्षाव्यवस्थापनस्य च विविधा योजनाः

३.५ फलितज्योतिषशिक्षणेऽनुसन्धानात्मकपरियोजनाकार्यस्यावश्यकता कार्यमूलकानुसन्धान-(Action Research)स्य प्रयोगात्मकाभ्यासाश्च

**प्रकरणं चतुर्थम् – फलितज्योतिषशिक्षणे शिक्षणविधयः शैक्षणिकप्रविधयश्च**

४.१ माध्यमिकस्तरे फलितज्योतिषपाठ्यक्रमे  शिक्षणसहजीकरणाय विषयवस्तूनां चयनप्रक्रिया तस्या आवश्यकता च

४.२ विद्यार्थिलक्षितशिक्षणविधेः शिक्षकलक्षितशिक्षणविधेश्च परिचयः फलितज्योतिषशिक्षणे तयोः प्रयोगश्च

४.३ फलितज्योतिषशिक्षणे Zoom, Google meet, Team, Multimedia, Smart board, E-Library, YouTube, AI प्रभृतिवैद्युतसञ्जालानां प्रयोगः

४.४ वैद्युतसञ्जालानां प्रयोगेण फलितज्योतिषशिक्षणे प्रत्यक्षाप्रत्यक्ष-(Online-Offline)शिक्षणविधयः

४.५ फलितज्योतिषशिक्षणे प्रभावकारिशिक्षणविधयस्तेषां प्रयोग उपलब्धयश्च

**प्रकरणं पञ्चमम् – फलितव्योतिषस्य पाठ्यक्रमाः पाठ्यपुस्तकानि च**

५.१ फलितज्योतिषस्य पाठ्यक्रमः, प्रचलितपाठ्यक्रम-पाठ्यग्रन्थयोरन्तःसम्बन्धः, फलितज्योतिष-पाठ्यपुस्तकानामन्येषां पाठ्यपुस्तकानाञ्च पार्थक्यम्

५.२ पाठ्यक्रमस्य प्रमुखान्यङ्गानि, फलितज्योतिषस्य पाठ्यक्रमे तेषां संयोजनम्

५.३ माध्यमिकस्तरीयफलितज्योतिषस्य पाठ्यक्रमः, शिक्षणोपलब्धयः, विषयक्षेत्राणि च

५.४ फलितज्योतिषस्य पाठ्यपुस्तकानां परिचयः, शिक्षकनिर्देशिकाया महत्त्वं सन्दर्भपाठ्यसामग्रीणां समीक्षणञ्च

५.५ (क) फलितज्योतिषपाठ्यक्रमे विद्यार्थिमूल्याङ्कनस्यावधारणाः, प्रकाराः, प्रक्रिया वैशिष्ट्यञ्च

(ख) मूल्याङ्कने विशिष्टीकरणतालिकाधारेण प्रश्नपत्रोत्तरकुञ्जिकयोर्निर्माणं तत्प्रयोगविधिश्च

**खण्डः ख**

**प्रकरणं षष्ठम् – फलादेशस्याधारभूतविषयशिक्षणम्**

६.१ प्रचलित-नेपालदेशीयपञ्चाङ्गानुसारेण ग्रहनक्षत्रराशीनां स्वामिनः, नक्षत्राणां स्थिरादिसंज्ञा, ग्रहाणामुदयास्तवक्रमार्गमूलत्रिकोणनीचोच्चकानि, सप्रयोजनमवकहडाचक्रसहितं वरवधूमेलापकचक्रञ्च

६.२ अन्नप्राशनचूडोपनयनविवाहगृहारम्भगृहप्रवेशयात्राणां पञ्चाङ्गशुद्धिपूर्वकं शुभलग्नसाधनम्, लग्नाधारेण शुभसमयनिर्धारणम्, विवाहव्रतबन्धयोर्लग्नपत्रिकालेखनम्, तिथिवारनक्षत्रदिक्शूलानि तेषां दोहदश्च

६.३ जन्मकालिकसमयानुसारेण इष्टघट्यादिसाधनम्, भयातभभोगानयनम्, षड्वर्गसाधनम्, ससन्धिद्वादशभावसाधनम्, भावसन्धियुक्तं चलितचक्रनिर्माणम्, षडवर्गकुण्डलीनिर्माणम्, भुक्तोनविंशोत्तरीत्रिभागीयोगिनीदशासाधनपूर्वकं फलवर्णनम्, तन्वादिभावस्थितानां सूर्यादिग्रहाणां फलवर्णनम्, नेपालदेशीयपञ्चाङ्गाधारेणान्यदेशीयसूर्योदयसाधनम्, राश्युदयसाधनम्, विदेशे जातानां जन्मपत्रिकानिर्माणम्, वर्षलग्नसाधनम्, सप्रयोजनं पञ्चाधिकारिसाधनम्, वर्षेशनिर्णयप्रकारस्तत्फलादेशश्च

६.४ हस्तपादमुखललाटकर्णनासिकानयनलक्षणाधारेण फलवर्णनम्, गोत्रद्रव्ययशोविद्यायुर्मातृपितृबन्धुपत्निभाग्यसन्ततिमणिबन्धरेखाणामाधारेण फलादेशः, हस्तपादस्थितानां मीनमकरशङ्खपद्मशैलगजरथवृषचक्रकूपाङ्कुशासिकार्मुकशरच्छत्रचामरयवचिह्नानामाधारेण फलकथनम्, प्रश्नलग्ने भावस्य शुभाशुभत्वनिर्धारणम्, नष्टवस्तुनो लाभालाभज्ञानम्, तस्करस्य स्वरूपज्ञानम्, गर्भस्थ स्त्रीपुंसकत्वज्ञानम्, शकुनशास्त्रस्य परिचयः, शुभाशुभशकुनानि, अशुभशकुने दृष्ट इतिकर्तव्यता च

६.५ भास्वत्युक्तप्रकारेण ग्रहाणां ध्रुवबीजसाधनम्, अहर्गणसाधनम्, सूर्यस्य खण्डाङ्काः, सूर्यस्पष्टीकरणम्, मध्यमचन्द्र-चन्द्रकेन्द्र-स्पष्टचन्द्रानयनम्, चन्द्रसूर्ययोःस्पष्टगतिसाधनम्, तात्कालिकपञ्चाङ्गानयनम्, संक्रान्तिसाधनम्, पञ्चताराणां मध्यशीघ्रमन्दस्पष्टवक्रमार्गगतीनां साधनम्, तेषां स्पष्टीकरणम्, ताराग्रहाणां वक्रमार्गदिनादिकम्, ग्रहाणामस्तोदयांशाः, अगस्त्योदय, अयनांशचरदिनरात्रिमाननतकालानां साधनम्, स्पष्टलग्नानयनम्, लङ्कोदयमानात् स्वदेशोदयसाधनम्, ग्रहणे

स्पष्टशरग्रासस्थित्यर्धस्पर्शमध्यमोक्षकालनतबलनलम्बननतिसाधनम्, नतिलम्बनयोः संस्कारः, स्थितिबलनदानम्, चन्द्रसूर्ययोर्मानाङ्गुलस्पष्टीकरणञ्च

**प्रकरणं सप्तमम् – जातकशास्त्रं ताजिकशास्त्रञ्च**

७.१ ग्रहभेद-राशिभेद-वियोनिजन्म-निषेक-सूतिकाविषयाणां ज्ञानमरिष्टायुर्दायाष्टकवर्गद्विग्रहादियोगानां लक्षणफलवर्णनं नाभसयोगविश्लेषणञ्च

७.२ राजयोगविमर्शनम्, राशिशील-ऋक्षशील-प्रव्रज्या-नष्टजातकफलनिरूपणम्, जातकपद्धत्या ग्रहाणां बलाबलत्वनिरूपणं तेषां शयनाद्यवस्थानुसारेण बालाद्यवस्थानुसारेण च फलविवेचनम्

७.३ अन्येषामाचार्याणां मतापेक्षया पराशरमतस्य वैशिष्ट्यनिरूपणम्

७.४ जैमिनिमतानुसारेण ग्रहाणां कारकत्त्वनिरूपणपूर्वकमायुर्दायविवेचनम्

७.५ ताजिकग्रन्थानुसारेण वर्षप्रवेशसाधनपूर्वकं वर्षेश-वर्षफलयोर्ज्ञानं सफलं मुथहा-सहमपरिज्ञानञ्च

**प्रकरणमष्टमम् – सूर्यसिद्धान्तानुशीलनम्**

८.१ सौरोक्तविधिना ग्रहस्पष्टीकरणपूर्वकं पञ्चाङ्गसाधनम्, ग्रहगतिसाधनञ्च

८.२ सूर्यसिद्धान्तानुसारेण ग्रहाणां वक्रमार्गोदयास्तसाधनं दिग्देशकालसाधनञ्च

८.३ सूर्यसिद्धान्तानुसारेण चन्द्रसूर्यग्रहणसम्बद्धविषयाणां निरूपणम्

८.४ गोलीयक्षेत्राणां तत्सम्बद्धविषयाणाञ्च परिचयप्रदानम्

८.५ सूर्यसिद्धान्तोक्त-ज्योतिषोपनिषन्मानाध्यायसम्बद्धविषयाणां परिज्ञानम्

**प्रकरणं नवमम् – वास्तुशास्त्रम्, स्वरशास्त्रं ग्रहचारफलञ्च**

९.१ वास्तुशास्त्रानुसारेण भूमिशोधनम्, शल्यज्ञानम्, गृहपिण्डानयनम्, आयानुरूपगृहक्षेत्रफलसाधनम्, गृहारम्भविधिः, गृहप्रवेशविधिः, दिक्परत्त्वेन गृहवास्तुविभागनिरूपणञ्च

९.२ वास्तुशास्त्रानुसारेण वृक्षारोपणविधिः, जलाशयनिर्माणविधिश्च

९.३ स्वरशास्त्रस्य परिचयः,मात्रा-वर्ण-जीव-ग्रह-राशि-नक्षत्र-पिण्ड-योग-वर्ष-अयन-ऋतु-मास-पक्ष-दिन-घटी-तिथि-वार-नक्षत्र-दिक्स्वराणां परिचयः, फलादेशे तेषां प्रयोगश्च

९.४ फलादेश इतरशास्त्रापेक्षया स्वरशास्त्रस्य वैशिष्ट्यप्रतिपादनं पञ्चस्वराणामाधारेणारिष्टविवेचनञ्च

९.५ नवग्रहाणाम्, सप्तर्षीणाम्, अगस्त्यस्य च चारवशाज्जायमानं फलवर्णनं ग्रहाणां चारवशाज्जायमानं गोचरफलविश्लेषणञ्च

**प्रकरणं दशमम् – शोधविधेरध्ययनं ज्योतिषप्रबन्धलेखनञ्च**

१०.१ शोधपरिचयः (आवश्यकता, परम्परा, महत्त्वमौचित्यञ्च), शोधप्रस्तावः, सामग्रीसङ्कलनविधिः, शोधनिर्देशकस्यावश्यकता च

१०.२ शोधविधिः, पादटिप्पण्यनुसन्धानप्रतिवेदनलेखनं सन्दर्भसूचीनिर्माणञ्च,

१०.३ गो-श्व-कुक्कुट-कूर्म-छागाश्व-हस्ति-पुरुष-पञ्चमहापुरुष-स्त्रीलक्षणफलविषयमवलम्ब्य समीक्षात्मकं प्रबन्धलेखनम्

१०.४ वराह-वैद्यनाथ-कल्याणवर्मणां मतानि विश्लेष्य भावफल-स्त्रीजातकफलविषयकं विवेचनात्मकमालेखनम्

१०.५ पराशर-वराह-वैद्यनाथ-कल्याणवर्मणां मतानि समीक्ष्य दशाविषयकं प्रबन्धलेखनम्

## विशिष्टीकरणतालिका

**विषयः फलितज्योतिषम्** **स्तर : माध्यमिक**

| प्रकरणम् | **विषयः** | **प्रश्नः** | अङ्काः |
|---|---|---|---|
| | **खण्डः क** | | |
| १ | फलितज्यौतिषविषयसम्बद्धावधारणा | १ | १० |
| २ | फलितज्योतिषस्य सैद्धान्तिकावधारणा | १ | १० |
| ३ | फलितज्योतिषशिक्षणे शिक्षणयोजना कक्षाव्यवस्थापनञ्च | १ | १० |
| ४ | फलितज्योतिषशिक्षणे शिक्षणविधयः शैक्षणिकप्रविधयश्च | १ | १० |
| ५ | फलितव्योतिषस्य पाठ्यक्रमाः पाठ्यपुस्तकानि च | १ | १० |
| | **खण्ड : ख** | | |
| ६ | फलादेशस्याधारभूतविषयशिक्षणम् | १ | १० |
| ७ | जातकशास्त्रं ताजिकशास्त्रञ्च | १ | १० |
| ८ | सूर्यसिद्धान्तानुशीलनम् | १ | १० |
| ९ | वास्तुशास्त्रम्, स्वरशास्त्रं ग्रहचारफलञ्च | १ | १० |
| १० | शोधविधेरध्ययनं ज्योतिषप्रबन्धलेखनञ्च | १ | १० |
| | **योगः** | १० | १०० |

**द्रष्टव्य :**

१.पाठ्यक्रम खण्ड क र खण्ड ख गरी दुई खण्डमा विभाजन गरिएको छ ।

२.सामान्यतया शिक्षणविधिसँग सोधिने प्रश्नहरू शिक्षणविधिसँग सम्बन्धित छन् ।

३.खण्ड **ख**बाट सोधिने प्रश्नहरू संज्ञानात्मक तहका हुनेछन् ।

४.प्रत्येक खण्डको लागि अलग अलग उत्तरपुस्तिकाको प्रयोग हुनेछ ।

५.लिखितपरीक्षाको माध्यम संस्कृतभाषा हुनेछ ।

६. यो पाठ्यक्रम २०८१/०७/२५ देखि लागु हुनेछ ।

**योग्यतार्हाः**

नेपालसंस्कृतविश्वविद्यालयादन्यस्माद्वा मान्यताप्राप्तविश्वविद्यालयात् फलितज्योतिषविषयमवलम्ब्य शास्त्रिस्तरं समुत्तीर्णजनाः प्रतिस्पर्धायां योग्या भवन्ति ।

नेपाल सरकार

शिक्षक सेवा आयोग

माध्यमिक तह, तृतीय श्रेणी शिक्षक पदको खुला प्रतियोगितात्मक परीक्षा

**नमूना प्रश्नपत्र**

**विषय : फलितज्योतिषम्** **पूर्णाङ्का : १००** **समय : घण्टात्रयम्**

**परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं मौलिकभाषया विलेखनीयम् ।**

**खण्डः क**

१. फलितज्योतिष-सिद्धान्तज्योतिषयोरन्तःसम्बन्धः विश्लेषणीयः । **१०**

२. फलितज्योतिषस्य वर्तमानस्वरूपं प्रदर्श्य जातकशास्त्रस्य विकासक्रमः समीक्षणीयः । **३+७ = १०**

३. षड्वर्गकुण्डलीशिक्षणायैकोपयुक्ता पाठयोजना निर्मेया । **१०**

४. भास्वतीगणितशिक्षणे शिक्षणसहजीकरणाय विषयवस्तूनां चयनप्रक्रिया विवेचनीया । **१०**

५. पाठ्यक्रमस्य प्रमुखान्यङ्गानि विलिख्य फलितज्योतिषस्य दशमकक्षायाः पाठ्यक्रमे तेषां संयोजनं कृतं न वेति विविच्यताम् । **२+८ = १०**

**खण्डः ख**

६. विवाहमुहूर्तं विलिख्य तल्लग्नशुद्धिप्रकारञ्च विवेचयत । **४+६ = १०**

७. ग्रहदृष्टिविषये जैमिनि-पराशर-वराहमतानां विश्लेषणं विधेयम् । **१०**

८. यत्र मध्यमरविः = १।५।७।१३, रविमन्दोच्चम् = २।१७।१६।५५ तत्र रविमन्दफलम् = ? **१०**

९. दिक्परत्वेन गृहवास्तुविभागनिरूपणं विधाय फलादेश इतरशास्त्रापेक्षया स्वरशास्त्रस्य वैशिष्ट्यं प्रतिपादयत । **४+६= १०**

१०. किन्नामानुसन्धानम् ? **'गोचरफलादेशे प्रयोक्तव्यविषयविवेचनम्'** इति शीर्षकमवलम्ब्यैकः प्रबन्धो लेख्यः । **३+७ = १०**